गुल्मिभिर्मन्दवह्निभिः ॥ इति राजनिर्घण्टः ॥ (अन्यत्सर्व्वं पनसशब्दे द्रष्टव्यम् ॥)

कण्ठार्त्तगला, स्त्री, (कण्ठा कण्ठयुक्ता आर्त्तगला ॥ आर्त्तः क्षीणः गलदेशो यस्याः ।) नीलझिण्टी । इति राजनिर्घण्टः ।(नीलझिण्टीशब्देऽस्य गुणादयो ज्ञेयाः ॥)

कण्टालुः,पुं, (कण्टाय कण्टकाय अलति पर्य्याप्नोति । कण्ट+अल्+उन् ।) वंशः । वृहती । वार्त्ताकी । वर्व्वूरः । इति राजनिर्घण्टः ॥

कण्टाक्र्यं, क्ली, (कण्टं कण्टकमाक्रयते स्पर्द्धते । कण्ट+आ+क्रै+कः ।) पद्मकन्दः । इति राजनिर्घण्टः ॥

कण्टी, [न्] पुं, (कण्टः कण्टकः अस्त्यस्य । अस्त्यर्थे इनिः ।) कषायः । अपामार्गः । खदिरः । गोक्षुरः । इति राजनिर्घण्टः ॥

कण्ठः, पुं, (कठि+अच्+इदित्वात् नुम् ।) मदनवृक्षः । इति मेदिनी ॥ होमकुण्डाद्बहिरङ्गुलिपरिमितस्थानम् । यथा,—

"खाताद्बाह्येऽङ्गुलः कण्ठः सर्व्वकुण्डेष्वयं विधिः" ॥ इति तिथ्यादितत्त्वम् ॥ (कणशब्द "कणेष्ठः" । इति ठः । उणां १ । १०५ ।) ग्रीवापुरोभागः ॥ तत्पर्य्यायः । गलः २ । इत्यमरः । २ । ६ । ८८ ॥ (यथा, शाकुन्तले । १म अङ्के ।

"विकचसरसिजायाः स्तोकनिर्मुक्तकण्ठं
निजमिवकमलिन्याः कर्कशं वन्तजालम्" ॥)

अत्र विशुद्धनामषोड़शदलपद्ममस्ति । यथा,—

"तदूर्द्धन्तु विशुद्धाख्यं दलषोड़शपङ्कजम् ।
स्वरैः षोड़शभिर्युक्तं धूमवर्णमहाप्रभम् ॥
विशुद्धपद्माख्यातमाकाशाख्यं महाद्भुतम्" ॥

इति गौतमतन्त्रम् ॥ निकटः । ध्वनिः । इति मेदिनी ॥

कण्ठकूणिका, स्त्री, (कण्ठ इव कण्ठध्वनिरिव कूणयतीति । कण्ठ+कूण+ण्वुल् । टापि अत इत्वं च वीणायाः कण्ठतुल्यस्वरध्वनिरितिप्रसिद्धेः ।) वीणा । इति हेमचन्द्रः ॥

कण्ठतलासिका, स्त्री, (कण्ठतले अश्वानां कण्ठदेशे आस्ते इति । कण्ठ+आस+ण्वुल्+टापि अत इत्वं च ।) अश्वग्रीवावेष्टकरज्जुचर्म्मादि । इति शब्दमाला ॥

कण्ठनीड़कः, पुं, (कण्ठे निकटस्थे नीड़े शकुन् दृष्ट्वा कायति शब्दायते । कण्ठ+कै+कः । यद्वा कण्ठे प्रासादवृक्षादीनां शिरोभागे नीड़ं यस्य+कप् ।) चिल्लपक्षी । इति त्रिकाण्डशेषः । चिल् इति भाषा ॥

कण्ठनीलकः, पुं, (कण्ठं धारकस्य कण्ठादिकमूर्द्धस्थानं नीलयति स्वशिखाकज्जलेन नीलवर्णं करोतीति । कण्ठ+नील+णिच्+ण्वुल् । अथवा कण्ठे शिखाग्रभागे नीलवर्णोऽस्य कप् ।) उल्का । इति शब्दमाला । मसाल इति भाषा ॥

कण्ठपाशकः,पुं, (कण्ठे पाश इव कायति प्रकाशते । कण्ठपाश+कै+कः ।) हस्तिगलवेष्टकरज्जुः । इति शब्दमाला ॥

कण्ठभूषा, स्त्री, (भूष्यतेऽनया इति भूषा । कण्ठस्य भूषा ।) ग्रीवालङ्कारः । तत्पर्य्यायः । ग्रैवेयकम् २ । इत्यमरः । २ । ६ । १०४ ॥ ग्रैवेयम् ३ ग्रैवम् ४ । इति शब्दरत्नावली ॥ ग्रवकः ५ निष्कम् ६ । इति जटाधरः ॥

कण्ठमणिः, पुं, (कण्ठे कण्ठस्थले धारणीयो मणिः । कण्ठस्य मणिर्वा ।) गलदेशधारणीयमणिः । तत्पर्य्यायः । काकलम् २ । इति त्रिकाण्डशेषः ॥

कण्ठ्यः, त्रि, (कण्ठे+भवः । शरीरावयवत्वात् यत् । ६ । १ । २१३ ।) कण्ठोद्भवशब्दादिः । इति व्याकरणम् ॥ "अकुहविसर्ज्जनीयानां कण्ठः" । पा । १ । १ । ९ वार्त्तिके ॥)

कण्ठाग्निः, पुं, (कण्ठे कण्ठाभ्यन्तरे अग्निः पाचनरूपाग्निर्यस्य ।) पक्षी । इति त्रिकाण्डशेषः ॥

कण्ठालः, पुं, (कठि+आलच् ।) शूरणः । युद्धम् । नौका । खनित्रम् । इति विश्वः ॥ क्रमेलकः । गोणीप्रभेदः । इति मेदिनी ॥

कण्ठाला, स्त्री, (कठि+आलच्+टाप् ।) जालगोणीका । इति त्रिकाण्डशेषो मेदिनी च ॥

कण्ठिका, स्त्री, (कण्ठो भूष्यतयास्त्यस्याः । कण्ठ+ठन् टाप् च । यद्वा कण्ठयति कण्ठं भूषयति या । कठि+णिच्+ण्वुल्+टाप् अत इत्वम् ।) कण्ठाभरणम् । इति हेमचन्द्रः ॥ एकनरी कण्ठी इति भाषा ॥

कण्ठी, स्त्री, (कण्ठ+अल्पार्थे ङीप् ।) अश्व कण्ठवेष्टनरज्जुचर्म्मादि । इति शब्दमाला ॥ गलः । इत्यमरटीकायां भरतः ॥

कण्ठीरवः, पुं, (कण्ठ्यां रवो यस्य ।) सिंहः । इति त्रिकाण्डशेषः ॥ पारावतः । इति राजनिर्घण्टः ॥ मत्तहस्ती । इति सारस्वतः ॥

कण्ठीरवी, स्त्री, (कण्ठीरव+गौरादित्वात् जातौ वा ङीष् ।) वासकवृक्षः । इति राजनिर्घण्टः ॥

कण्ठेकालः, पुं, (कण्ठे+कालः क्षीरोदमथनोद्भवविषपाननिदर्शनरूपनीलवर्णो यस्य । सप्तम्या अलुक् ।) महादेवः । इति त्रिकाण्डशेषः ॥ (कण्ठे जीवानां कण्ठदेशं कालः कालस्वरूपेण वर्त्तते । यद्वा कण्ठदेशपर्य्यन्तं आक्रम्य तमःप्रधाना माया अस्त्यस्य । परमात्मनः मायाशवलितत्रिपादत्वात् तथात्वम् । एष सर्व्वज्ञः सर्व्वान्तर्यामीश्वरः । एतस्मात् पादत्रयादन्यत् तुरीयं निष्कलं निरुपाधिकं शिवपादमस्ति ॥

यथा, माण्डूक्योपनिषदि ।

"सर्व्वं ह्येतद्ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात्" ॥ २ ॥

"जागरितस्थानो वहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुक् वैश्वानरः प्रथमः पादः" ॥३॥

"स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक् तैजसो द्वितीयः पादः" ॥ ४॥

"यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम् । सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः" ॥ ५ ॥

"एष सर्व्वेश्वरः एष सर्व्वज्ञ एषोऽन्तर्य्याम्येष योनिः सर्व्वस्य प्रभवाप्ययौ हि भूतानाम्" ॥ ६ ॥

"नान्तःप्रज्ञं न वहिःप्रज्ञं नोभयतः प्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञमदृष्टमव्यवहार्य्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः" ॥ ७ ॥)

कण्डनं, क्ली, (कड़ि+भावे ल्युट् ।) उदूखलादिना तण्डुलादेर्निर्म्मलीकरणं । इति हेमचन्द्रः । काँड़ान इति भाषा ॥

कण्डनी, स्त्री, (कण्ड्यते तुषादिरपनीयतेऽनया । कड़ि+करणे ल्युट् । ङीप् च ।) उदूखलम् । इति त्रिकाण्डशेषः ॥ (यथा, मनुः । ३ । ६८ ।

"पञ्चसूना गृहस्थस्य चुल्लीपेषण्युपस्करम् ।
कण्डनीचोदकुम्भश्च बध्यते यास्तु वाहयन्" ॥)

कण्डरा, स्त्री, (कड़ि+अरन् टाप् च ।) महास्नायुः । महानाड़ी । इति हेमचन्द्रः ॥

("महत्यः स्नायवः प्रोक्ताः कण्डरास्तास्तु षोड़श ।
प्रसारणाकुञ्चनयोर्दृष्टं तासां प्रयोजनम् ॥
चतस्रो हस्तयोस्तासां तावत्यः पादयोः स्मृताः ।
ग्रीवायामपि तावत्यस्तावत्यः पृष्ठसङ्गताः" ॥

"तत्र पादहस्तगतानां कण्डराणां नखाः प्ररोहाः ग्रीवानिबन्धनानामधोभागगतानां प्ररोहा मेढ्रः पृष्ठनिबन्धनां प्ररोहो नितम्बमूर्द्धोरुवक्षोऽस्तनपिण्डाः" ॥ इति भावप्रकाशः ॥

"तलं प्रत्यङ्गुलीनां याः कण्डरा बाहुपृष्ठतः ।
बाह्वोः कर्म्मक्षयकरी विश्वाचीति हि सोच्यते" ॥

इति च सुश्रुतः ॥)

कण्डुः, स्त्री, (कण्डते शरीरं माद्यति अस्मात् उष्णशोणितत्वात् । यद्वा कण्डयति कण्डुयुक्तं करोति शरीरम् । कड़ि+मदे । "मृगय्वादयश्च" । उणां १ । ३८ । इति कुः ।) कण्डूः । इति रायमुकुटः ॥ (पुं ऋषिविशेषः । (यथा, विष्णुपुराणे १ । १५ । ११ ।

"कण्डुर्नाम मुनिः पूर्व्वमासीद्वेदविदां वरः ।
सुरम्ये गोमतीतीरे स तेपे परमं तपः" ॥

तद्विवरणं तत्रैव १मांशे १५ अध्याये द्रष्टव्यम् ।)

कण्डुरः, पुं, (कण्डूं राति ददातीति । "आतोनुपसर्गे कः" । ३ । २ । ३ । पृषोदरादित्वात् ह्रस्वः ।) कारवेल्लकलता । कुन्दरुष्णम् । इति राजनिर्घण्टः ॥

कण्डुरा,स्त्री,कण्डुं राति । कण्डू+रा+कः । ह्रस्वश्च । ततष्टाप् ।) कपिकच्छुः । अव्यम्लपर्णी । इति राजनिर्घण्टः ॥ (शूकशिम्बीशब्दे विशेषोऽस्य वक्तव्यः ॥

कण्डूः, स्त्री (कण्डूय+सम्पदादित्वात् क्विप् अलोपयलोपौ ।) रोगविशेषः । चुल्कानि खोस् इत्यादि भाषा । (यथा, भागवते । २ । ७ । १३ ।

"पृष्ठेन कच्छपवपुर्विदधार गोत्रं
निद्राक्षणोऽद्रिपरिवर्त्त कषाण कण्डूः" ॥)

तत्पर्य्यायः । खर्ज्जुः २ कण्डूया ३ । इत्यमरः । २ । ६ । ५३ ॥ कण्डूति ४ । इति तट्टीका ॥ कण्डूयनम् ५ । इति राजनिर्घण्टः ॥

तच्चिकित्सा यथा,—